श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पुरुषसूक्तम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ पुरुषसूक्तम् ॥

॥ हरिः ओ(४)म् ॥

स॒हस्र॑ शीर्॑षा॒ पुरु॑षः।
स॒ह॒स्रा॒क्षः स॒हस्र॑पात्।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा।
अत्य॑तिष्ठद्दशाङ्गु॒लम्।
पुरु॑ष ए॒वेदग्ं सर्वम्᳚।
यद्भू॒तं यच्च॒ भव्यम्᳚।
उ॒तामृ॑त॒त्वस्येशा॑नः।
यदन्ने॑नाति॒रोह॑ति।
ए॒तावा॑नस्य महि॒मा।
अतो॒ ज्याया॑ग्श्च॒ पूरु॑षः ॥ **1** ॥

पादो᳚ऽस्य॒ विश्वा॑ भू॒तानि॑।
त्रि॒पाद॑स्या॒मृतं॑ दि॒वि।
त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः।
पादो᳚ऽस्ये॒हाभ॑वा॒त्पुनः॑।
ततो॒ विष्व॒ङ्व्य॑क्रामत्।

साशनानशने अभि।
तस्माँद्विराडंजायत।
विराजो अधि पूरुंषः।
स जातो अत्यंरिच्यत।
पश्चाद्भूमिमथों पुरः॥ 2॥

यत्पुरुंषेण हविषाँ।
देवा यज्ञमतंन्वत।
वसन्तो अंस्यासीदाज्यँम्।
ग्रीष्म इध्मश्शरद्धविः।
सप्तास्यांसन्परिधयंः।
त्रिस्सप्त समिधंः कृताः।
देवा यद्यज्ञं तंन्वानाः।
अबंध्नन्पुरुंषं पशुम्।
तं यज्ञं बर्हिषि प्रौक्षन्ं।
पुरुंषं जातमंग्रतः॥ 3॥

तेनं देवा अयंजन्त।
साध्या ऋषंयश्च ये।
तस्माँद्यज्ञाथ्सर्वहुतंः।
सम्भृंतं पृषदाज्यम्।
पशूग्स्ताग्श्चंक्रे वायव्यान्ं।

आ॒र॒ण्यान्ग्रा॒म्याश्च॒ ये।
तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः।
ऋच॒स्सामा॑नि जज्ञिरे।
छन्दा॑ग्ंसि जज्ञिरे॒ तस्मा॑त्।
यजु॒स्तस्मा॑दजायत॥ **4**॥

तस्मा॒दश्वा॑ अजायन्त।
ये के चो॑भ॒याद॑तः।
गावो॑ ह जज्ञिरे॒ तस्मा॑त्।
तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः।
यत्पुरु॑षं॒ व्य॑दधुः।
क॒ति॒धा व्य॑कल्पयन्।
मुखं॒ किम॑स्य॒ कौ बा॒हू।
कावू॒रू पादा॑वुच्येते।
ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीत्।
बा॒हू रा॑ज॒न्य॑ः कृ॒तः॥ **5**॥

ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः।
प॒द्भ्याग्ं॒ शू॒द्रो अ॑जायत।
च॒न्द्रमा॒ मन॑सो जा॒तः।
चक्षो॒स्सूर्यो॑ अजायत।
मु॒खा॒दिन्द्र॑श्चा॒ग्निश्च॑।

प्रा॒णाद्वा॒युर॑जायत।
नाभ्या॑ आसीद॒न्तरि॑क्षम्।
शी॒र्ष्णो द्यौस्सम॑वर्तत।
प॒द्भ्यां भूमि॒र्दिश॒श्श्रोत्रा᳚त्।
तथा॑ लो॒काग्ं अ॑कल्पयन्॥ **6**॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्त᳚म्।
आ॒दि॒त्यव॑र्णं॒ तम॑स॒स्तु पा॒रे।
सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीर॑ः।
नामा॑नि कृ॒त्वाऽभि॒वद॒न् यदास्ते᳚।
धा॒ता पु॒रस्ता॒द्यमु॑दाज॒हार॑।
श॒क्रः प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः।
तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति।
नान्यः पन्था॒ अय॑नाय विद्यते।
य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः।
तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।
ते ह॒ नाकं॑ महि॒मान॑स्सचन्ते।
यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः॥ **7**॥

अ॒द्भ्यस्सम्भू॑तः पृथि॒व्यै रसा᳚च्च।
वि॒श्वक॑र्मण॒स्सम॑वर्त॒ताधि॑।
तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति।

तत्पुरुषस्य विश्वमाजानमग्रे।
वेदाहमेतं पुरुषं महान्तम्।
आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति।
नान्यः पन्था विद्यतेऽयनाय।
प्रजापतिश्चरति गर्भे अन्तः।
अजायमानो बहुधा विजायते॥ **8**॥

तस्य धीराः परिजानन्ति योनिम्।
मरीचीनां पदमिच्छन्ति वेधसः।
यो देवेभ्य आतपति।
यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातः।
नमो रुचाय ब्राह्मये।
रुचं ब्राह्मं जनयन्तः।
देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्।
तस्य देवा असन्वशे॥ **9**॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ।
अहोरात्रे पार्श्वे।
नक्षत्राणि रूपम्।

अ॒श्विनौ॒ व्यात्त᳚म्।
इ॒ष्टं म॑निषाण।
अ॒मुं म॑निषाण।
सर्वं᳚ मनिषाण॥ **10**॥

॥ इति पुरुषसूक्तं समाप्तम्॥